# सुन्दरकाण्ड सप्तदशः सर्गः (१७) - ॥ राक्षसी दर्शनम् ॥

ततः कुमुदषण्डाभो निर्मलो निर्मलं स्वयम् ।
प्रजगाम नभश् चन्द्रो हंसो नील मिवोदकम् ॥ १ ॥

साचिव्य मिव कुर्वन् स प्रभया निर्मल प्रभः ।
चन्द्रमा रश्मिभिः शीतैः सिषेवे पवनात्मजम् ॥ २ ॥

स ददर्श ततः सीतां पूर्णचन्द्र निभाननाम् ।
शोकभारै रिव न्यस्तां भारैर् नाव मिवाम्भसि ॥ ३ ॥

दिदृक्षमाणो वैदेहीं हनुमान् मारुतात्मजः ।
स ददर्शा विदूरस्था राक्षसीर् घोर दर्शनाः ॥ ४ ॥

एकाक्षी मेक कर्णां च कर्ण प्रावरणां तथा ।
अकर्णां शङ्कु कर्णां च मस्त कोच्छ्वास नासिकाम् ॥ ५ ॥

अतिकायोत्त माङ्गीं च तनु दीर्घ शिरोधराम् ।
ध्वस्त केशीं तथा केशीं केश कम्बल धारिणीम् ॥ ६ ॥

लम्ब कर्ण ललाटां च लम्बोदर पयोधराम् ।
लम्बोष्ठीं चुबुकोष्ठीं च लम्बास्यां लम्ब जानुकाम् ॥ ७ ॥

ह्रस्व दीर्घां तथा कुब्जां विकटां वामनां तथा ।
करालां भुग्न वक्त्रां च पिङ्गाक्षीं विकृताननाम् ॥ ८ ॥

विकृताः पिङ्गलाः कालीः क्रोधनाः कलह प्रियाः ।
कालायस महाशूल कूट मुद्गर धारिणीः ॥ ९ ॥

वराह मृग शार्दूल महिषाज शिवामुखीः ।
गजोष्ट्र हय पादीश्च निखात शिरसोऽपराः ॥ १० ॥

एक हस्तैक पादाश्च खर कर्ण्य श्व कर्णिकाः ।
गो कर्णीर् हस्ति कर्णीश्च हरि कर्णीस् तथापराः ॥ ११ ॥

अनासा अति नासाश्च तीर्यङ् नासा विनासिकाः ।
गज सन्निभ नासाश्च ललाटोच्छ्वास नासिकाः ॥ १२ ॥

हस्तिपादा महापादा गोपादाः पादचूलिकाः ।
अतिमात्र शिरोग्रीवा अतिमात्र कुचोदरीः ॥ १३ ॥

अतिमात्रास्य नेत्राश्च दीर्घ जिह्वा नखास्तथा ।
अजामुखीर् हस्तिमुखीर् गोमुखीः सूकरी मुखीः ॥ १४ ॥

हयोष्ट्र खर वक्त्राश्च राक्षसीर् घोर दर्शनाः ।
शूल मुद्गर हस्ताश्च क्रोधनाः कलहप्रियाः ॥ १५ ॥

कराला धूम्र केशीश्च राक्षसीर् विकृताननाः ।
पिबन्तीः सततं पानं सदा मांस सुराप्रियाः ॥ १६ ॥

मांस शोणित दिग्धाङ्गीर् मांस शोणित भोजनाः ।
ता ददर्श कपिश्रेष्ठो रोमहर्षण दर्शनाः ॥ १७ ॥

स्कन्धवन्त मुपासीनाः परिवार्य वनस्पतिम् ।
तस्याधस्ताच्च तां देवीं राजपुत्री मनिन्दिताम् ॥ १८ ॥

लक्षयामास लक्ष्मीवान् हनुमान् जनकात्मजाम् ।
निष्प्रभां शोक सन्तप्तां मल सङ्कुल मूर्धजाम् ॥ १९ ॥

क्षीण पुण्यां च्युतां भूमौ तारां निपतितामिव ।
चारित्र व्यपदेशाढ्यां भर्तृ दर्शन दुर्गताम् ॥ २० ॥

भूषणै रुत्तमैर् हीनां भर्तृ वात्सल्य भूषणाम् ।
राक्षसाधिप संरुद्धां बन्धुभिश्च विनाकृताम् ॥ २१ ॥

वियूथां सिंह संरुद्धां बद्धां गज वधूमिव ।
चन्द्ररेखां पयोदान्ते शारदाभ्रै रिवावृताम् ॥ २२ ॥

क्लिष्ट रूपा मसंस्पर्शा दयुक्ता मिव वल्लकीम् ।
सीतां भर्तृ वशे युक्ता मयुक्तां राक्षसी वशे ॥ २३ ॥

अशोक वनिका मध्ये शोक सागर माप्लुताम् ।
ताभिः परिवृतां तत्र सग्रहामिव रोहिणीम् ॥ २४ ॥

ददर्श हनुमान् देवीं लताम कुसुमामिव ।
सा मलेन च दिग्धाङ्गी वपुषा चाप्यलङ्कृता ॥ २५ ॥

मृणाली पङ्क दिग्धेव विभाति न विभाति च ।
मलिनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् ॥ २६ ॥

संवृतां मृग शाबाक्षीं ददर्श हनुमान् क पिः ।
तां देवीं दीन वदना मदीनां भर्तृ तेजसा ॥ २७ ॥

रक्षितां स्वेन शीलेन सीता मसित लोचनाम् ।
तां दृष्ट्वा हनुमान् सीतां मृगशाब निभेक्षणाम् ॥ २८ ॥

मृग कन्यामिव त्रस्तां वीक्षमाणां समन्ततः ।
दहन्तीमिव निःश्वासैर् वृक्षान् पल्लव धारिणः ॥ २९ ॥

सङ्घात मिव शोकानां दुःखस्योर्मि मिवोत्थिताम् ।
तां क्षमां सुविभक्ताङ्गीं विना भरण शोभिनीम् ॥ ३० ॥

प्रहर्ष मतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम् ।
हर्षजानि च सोऽश्रूणि तां दृष्ट्वा मदिरेक्षणाम् ॥ ३१ ॥

मुमोच हनुमांस्तत्र नमश्चक्रे च राघवम् ।
नमस्कृत्वा स रामाय लक्ष्मणाय च वीर्यवान् ।
सीता दर्शन संहृष्टो हनुमान् संवृतोऽभवत् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तदशः सर्गः ॥ १७ ॥